SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Special Issue, (December) 2025

# कोशालानन्दमहाकाव्ये पञ्चार्थप्रकृतीनां विचारः

**Ananga Udaya Bhoi**
Research Scholar
Department of Vaidic Darshan, S.V.D.V
Banaras Hindu University, Varanasi, Uttar Pradesh, India.
Email: anangaudaya94@gmail.com

**Abstract:** "संस्कृतवाङ्मये महाकाव्यानां स्थानं विशिष्टं गौरवपूर्णं च निःसन्देहमस्ति। अत्र निरूपितः कथाविन्यासः केवलं रसालङ्कारछन्दसौन्दर्यैरेव नालङ्कृतः, अपि तु तत्र अन्तर्निहितसांस्कृतिकनैतिकदार्शनिक-गूढार्थबोधेन तस्य महत्त्वं पुनरपि वर्धते। अयं गूढार्थबोधः न केवलं काव्यरसस्य गहनमास्वादनं करोति, किन्तु श्रोतापाठकयोः उभयोः अन्तःकरणे मूल्यबोधं धर्मचिन्तनं जीवनदृष्टेः च परिष्कारं साधयति। अत एव महाकाव्यपरम्परा भारतीयसाहित्यप्रवाहे न केवलं कलात्मकाभिव्यक्तेः साधनं , अपि तु सांस्कृतिकसंस्कारस्य तत्त्वबोधस्य च सेतुरिति परिगण्यते। कोशालानन्दमहाकाव्यं तादृशेषु ग्रन्थेषु प्रमुखं गण्यते, यत्र इतिहासस्य, काव्यसौन्दर्यस्य च सम्यक् समन्वयो विद्यते। संस्कृतसाहित्यशास्त्रे पञ्चार्थप्रकृतयः -बीजं-बिन्दु-पताका-प्रकरी-कार्यमिति प्रतिपादिताः सन्ति। एतानि तत्त्वानि वृत्तान्तसंरचनायाः मेरुदण्डरूपेण स्थितानि यानि कोशालानन्दमहाकाव्येऽपि स्पष्टमवलोकयितुं शक्यन्ते। महाकाव्यरचनाविन्यासे कथायाः ओजस्विता, गूढार्थबोधः तथा साहित्यिकमाधुर्यं सुस्पष्टं दृश्यते। यत्र इतिहाससमूलकप्रसङ्गाः अपि काव्यरमणीयतया विराजन्ते, तत्र अस्य महाकाव्यस्य साहित्यशास्त्रीयमहत्वं विशेषतया प्रकाशते। अतः अस्य ग्रन्थस्याध्ययनं न केवलं काव्यसौन्दर्यपरिज्ञानाय अपि तु अर्थगाम्भीर्यस्य अनुसन्धानाय अत्यावश्यकं वर्तते। कोशालानन्दमहाकाव्यस्य समीक्षणेन ज्ञायते यत् पञ्चार्थप्रकृतयः न केवलं कथाविन्यासंरचनायाः आधारभूततत्त्वम् अपि तु सम्पूर्णकाव्यशास्त्रस्यात्मा अपि वर्तते। अयं लघुलेखसारस्य,विस्तृतविवेचनं अधः प्रदास्यते।

**Keywords:** कोशालानन्दमहाकाव्यं, साहित्यदर्पणं, बीजं, बिन्दुः, पताका, प्रकरी, कार्यम्।

**उपक्रमः**

भारतीयसंस्कृतिसाहित्ये महाकाव्यानां परम्परा प्राचीनकालेभ्य एव गाम्भीर्य, रमणीयता तथा तात्त्विकतायाः अद्वितीयसंयोगेन प्रसिद्धा वर्तते। संस्कृतवाङ्मये महाकाव्यानां स्थानं न केवलं साहित्यिकसौन्दर्यस्य कारणेन, अपि तु अन्तर्निहितसांस्कृतिक, नैतिक, दार्शनिकचिन्तनप्रवृत्तेः हेतुना अपि विशिष्टं परिगण्यते। रस, अलङ्कार, छन्दसौन्दर्यादयः तत्र शोभावर्धनकारिणः भवन्ति, किन्तु गूढार्थबोध एव तेषां आत्मा इति विद्वज्जनैः स्वीकृतम्।

एवंविधेषु महाकाव्येषु कोशालानन्दमहाकाव्यम् एकं प्रमुखस्थानं धारयति, यत्र इतिहासप्रसङ्गस्य साहित्यिकाभिव्यक्त्या सह सम्यक् समन्वयः प्रतीयते। काव्येऽस्मिन् संस्कृतसाहित्यशास्त्रे निर्दिष्टाः पञ्चार्थप्रकृतयः—बीज-बिन्दु-पताका-प्रकरी- कार्यम् इत्येताः वृत्तान्तसंरचनायाः मेरुदण्डरूपेण प्रतिष्ठिताः सन्ति। कथाविन्यासस्य ओजस्विता, गूढार्थबोधः तथा काव्यमाधुर्यं तत्र सुस्पष्टं प्रतीयते, यत्र इतिहाससमूलकप्रसङ्गाः अपि साहित्यरमणीयतया नूतनं सौन्दर्यम् आप्नुवन्ति।

अतः कोशालानन्दमहाकाव्यस्य अध्ययनं न केवलं काव्यरसपरिज्ञानाय, अपि तु अर्थगाम्भीर्यस्य अनुसन्धानाय च परमावश्यकं मन्यते। एतस्य समीक्षणेन ज्ञायते यत् पञ्चार्थप्रकृतयः न केवलं कथाविन्याससंरचनायाः आधारभूततत्त्वानि, अपि तु सम्पूर्णकाव्यशास्त्रस्य आत्मरूपं वहन्ति।

**कोशालानन्दमहाकाव्यस्य संक्षिप्तसारकथा —**

ओड़ियालिप्या संस्कृतभाषया च ताडपत्रपाण्डुलिप्यां लिखितम् एकं संस्कृतमहाकाव्यमस्ति, यत् अनुमानतः १६५०-१७०० ईसवीमध्ये पण्डितगङ्गाधरमिश्रेण विरचितम्। काव्येऽस्मिन् ओडीशाराज्यस्य पश्चिमप्रान्तीय चौहाणवंशीयराज्यस्य ऐतिहासिकं विस्तृतवर्णनं दृश्यते, येन एतत् संस्कृतसाहित्ये महत्त्वपूर्णं महाकाव्यमित्यभिधीयते। पण्डितमिश्रः सम्बलपुरराजाबलिआरसिंहदेवस्य राजसभायां कविरासीत्। स पुरीक्षेत्रस्य प्रसिद्धविदुषोः कव्योश्च शम्भुकर-विद्याकरयोः वंशजः तथा पण्डितगोपीनाथस्य पुत्रः आसीत्। महाकाव्येऽस्मिन् एकविंशतिसर्गाः सन्ति। अस्य आरम्भः नमस्कारात्मक-मङ्गलाचरणेन क्रियते, ततः गजैव कोशलप्रदेशस्य स्वरूपवर्णनं, रणसिंहस्य राज्यच्युतिर्वर्णनञ्च वर्तते। अनन्तरं चौहानराजवंशोत्पत्तिः, पृथ्वीराजस्य परवर्तीवंशस्य विवेचनं, पट्टनराज्ये व्याघ्रस्योत्तिः तथा तेन कृतः उपद्रवात्, रामदेवेन तस्य वधः, तदनन्तरं तस्य राज्यप्राप्तिर्राज्याभिषेकश्च, पञ्चदेवस्तुतिः, पुरुषोत्तमक्षेत्रवर्णनं, गजपतेः भ्रातृपुत्र्या सह राजारामदेवस्य विवाहवर्णनं, पुरुषोत्तमक्षेत्रे पण्डितैः रामदेवस्य कीर्तिवर्णनं, विवाहानन्तरं स्वदेशप्रत्यागमनं, चित्रोत्पलानदी प्राकृतिकदृश्यवर्णनञ्च पुनः स्वदेशे रामदेवस्यागमनं, फाल्गुनदोलायात्रावर्णनं, सम्बलपुरस्य राज्ञः बलरामदेवस्य वंशवर्णनमित्यादयः विषयाः विस्तृतरूपेण महाकाव्येऽस्मिन् निरूपिताः। अद्यावधि अस्य महाकाव्यस्य सम्यक् अनुसन्धानं नाभवत्। अतः मया अस्मिन्विषये लघुशोधात्मकः प्रयत्नः क्रियते।

**बीजादयः पञ्चार्थप्रकृतयः —**

अर्थप्रकृतयः नाटकीयकथावस्तुनः महत्वपूर्णानि तत्त्वानि सन्ति यत् न केवलं नाट्यफलप्राप्तेः साधनमपितु स्वयं नाट्यफलमपि मन्यन्ते। काव्यशास्त्रप्रवरैः धनञ्जय-विश्वनाथादयाचार्यैः तानि नाट्यप्रयोजनसिद्धेः कारणं मन्यन्ते। अस्य पञ्चभेदाः निर्दिष्टाः- बीजं, बिन्दुः, पताका, प्रकरी, कार्यञ्च। यथा आचार्यधनञ्जयेन —

"बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः।।"[1] इति

साहित्यदर्पणकारेणापि —

"बीजं बिन्दुः पताका च प्रकरी कार्यमेव च।
अर्थ प्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि।।
अर्थप्रकृतयः पञ्च प्रयोजनसिद्धिहेतवः।"[2] इति

**बीज —**

अग्निपुराणं बीजनामकां अर्थप्रकृतिम् एवं वर्णयति —

"अल्पमात्रं समुद्दिष्टं बहुधा यत् प्रसर्पति।
फलावसानं यच्चैव वीजं तदभिधीयते॥"[3]

साहित्यदर्पणकारेणापि —

"अल्पमात्रं समुद्दिष्टं बहुधा यद् विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते।।"[4]इति

यद् पूर्वं संक्षेपेण निवेद्यते, परन्तु कालान्तरं विस्तीर्णरूपेण प्रकटते, तत् 'बीजं' इति कथ्यते। फलसिद्धेः प्रमुखं कारणमिदं परिगण्यते। । अयं "बीजनामक अर्थप्रकृतिः" इत्युच्यते।

अत्रापि रामदेवस्य राज्यप्राप्तेः प्रथमः हेतुः आसीत्—यत् तस्मिन्नेव प्रदेशे अत्यन्तः भयङ्करः शार्दूलः प्रादुर्बभूव।[5] स महापराक्रमी शार्दूलः उन्मत्तः सञ्जातः वनभूमिं कम्पयन् प्रदेशवासिन् भयाकुलान् चकार।[6] ततः तत्रस्थानां जनानां घोषयामास— "यः कश्चन वीरः निजबाहुबलात् एतं व्याघ्रं हत्वा अस्माकं भयम् अपनेष्यति, स एव अस्माभिः राजा रूपेणाभिषिक्तो भविष्यति।[7] अथ सः व्याघ्रः रामस्य असिना आहतः सन् प्राणान् त्यक्तवान्।[8] अयं हि बीजनामक अर्थप्रकृतिः ।

**बिन्दुः —**

यत्र अवान्तरकथायां विच्छेदे जाते, तत्र वृत्तस्य पुनः संयोजनाय यत् कारणं प्रवर्तते, तत् एव अग्रेऽपि प्रवाहितं भवति। अतः विभिन्नाः साहित्यकाराः बिन्दोः लक्षणानि निम्नप्रकारेण परिभाषितवन्तः—

"अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।"[9] इति

यथा पुनः भरतमुनिना —

"प्रयोजनानां विच्छेदे यदविच्छेदकारणम्। यावत्समाप्तिर्वन्धस्य स बिन्दु परिकीर्तितः॥"[10] इति

यथा कोशलानन्दमहाकाव्ये तृतीयसर्गे,रामदेवः स्वपराक्रमप्रकाशनं कर्तुम् इच्छां न चक्रे, यतः महात्मानः स्वपौरुषस्य प्रकाशनं न कुर्वन्ति। पथभिक्षुकः भवितुं श्रेयः, किन्तु निजमुखेन स्वस्तुतिगानं परमं निन्दनीयम् इति चिन्तयन् सः सभायां मौनम् अवस्थितः। किन्तु रामदेवः व्याघ्रं हत्वा वनं परित्यज्य प्रतिनिवर्त्तमानः आसीत्। ततः सः विचारयामास यदि अन्यः कश्चन एतं व्याघ्रं मया निहतम् इति मिथ्याव्याहारं कुर्यात्, तर्हि अहम् आत्मपक्षं कथं समर्थयेयम्? अन्यच्च, यदि मया निहतस्य व्याघ्रस्य विषयः नगरवासिनां मनसि स्थानं न लभेत, तर्हि तेषां हृदये मम विषये अनुरागः कथं जायेत? इति चिन्तयन् सः रामदेवः मृतव्याघ्रस्य पुच्छं, नासिकां, कर्णौ, नखांश्च कर्तयित्वा निजसहितं आनयत्।[11] अयं बिन्दुः अर्थप्रकृतिः अत्र विद्यमाना वर्तते।

**पताका—**

या प्रसङ्गसङ्गता कथा विस्तीर्णरूपेण प्रसृत्या दूरपर्यन्तं व्याप्यते सा पताका इति कथ्यते। यथा साहित्यदर्पणे—

"व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते।"[12] इति

अतोऽत्र राजारामदेवः जगन्नाथदर्शनाय पुरुषोत्तमक्षेत्रगमनप्रसङ्गः दूरव्यापीनि वर्तते।[13] अतः पताकाऽर्थप्रकृतिः इत्यत्र वर्तते।

**प्रकरी —**

प्रसङ्गादागतं एकदेशस्थितं चरित्रं प्रकरी इति कथ्यते , यथा—

"प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता।"[14] इति

"प्रकरी नायकस्य स्यान्न स्वकीयं फलान्तरम्।।"[15] इति

भरतमुनिना प्रकरीविषये उक्तम् — या यस्याः फलं केवलं परार्थाय प्रकल्प्यते, या च अनुबन्धविहीना भवति, सा 'प्रकरी' इति निर्दिश्यते। यथा —

"फलं प्रकल्प्यते यस्याः परार्थायैव केवलम् ।
अनुबन्धं विहीनत्वात् प्रकरीति विनिर्दिशेत् ॥"[16] इति

नाट्यदर्पणकारेण यथा परिभाषतम्—

"प्रकरी चेद् क्वचिद् भावो, चेतन्योऽन्यप्रयोजनः।।"[17] इति

दशरूपककारोऽपि वर्णयति —

"प्रकरी च प्रदेशभाक्।।"[18] इति

यच्च स्वल्पं वस्तु, एकदेशवर्ति सा प्रकरी।

अत्र कोशालानन्दमहाकाव्ये प्रकरी अपि दृश्यते। राजारणसिंहः मदान्धः सञ्जातः नीतिहीनः च अभवत्। तस्मिन्नेव अवसरे गजपतिना तस्य राज्यम् अपहृतम् इति प्रसङ्गः तथा नन्दिघोषरथोत्सवस्य वर्णनं प्रकरी अर्थप्रकृतिः अस्ति।[19] (राज्ञः रणसिंहस्य पतनं गजपतेः राज्यहरणं वा, नन्दिघोषरथोत्सवस्य वर्णनं वा एते प्रसङ्गाः कथायाः मुख्यप्रवाहेन सह साक्षान्न सम्बद्धाः सन्ति, किन्तु महत्वपूर्णघटनानां संयोजने तथा कथायाः विस्तारकरणे साहाय्यं कुर्वन्ति। अत एव एषां प्रासङ्गानां स्वरूपं 'प्रकर्याः प्रासङ्गिकतत्त्वं' इति निर्दिश्यते।)

**कार्यम्—**

यं कार्यं कस्यचिदपेक्षितसाध्यस्य प्राप्त्यर्थमारभ्यते, तत् निबन्धनं कथ्यते। यश्च कार्यं कस्यचित् सिद्धेः सम्पादने सम्पन्नं भवति, तत् कार्यमिति । यथा साहित्यदर्पणे—

"अपेक्षितं तु यत्साध्यमारम्भो तन्निबन्धनः

समापनं तु यत्सिद्ध्यै तत्कार्यमिति संमतम्।।"[20] इति

महाकाव्येऽस्मिन्नपि फलसिद्ध्यर्थं शार्दूलः आविर्भूतः आसीत्, अन्ते च राज्ये आधिपत्यविस्तारः कार्यसिद्धिः अभवत्। अतः महाकाव्यस्य प्रमुखवृत्तान्तवर्णनप्रसङ्गे, यथा— रामदेवः स्वपराक्रमं प्रदर्श्य शार्दूलं हत्वा प्रदेशवासिनां भयं निवार्य पूर्वघोषणानुसारं स्वाधिपत्यं विस्तारितवान्, अयं प्रसङ्गः कार्यनामक अर्थप्रकृतिः इत्युच्यते।[21]

**उपसंहारः**

एवं कोशालानन्दमहाकाव्ये पञ्चार्थप्रकृतयः— बीजं, बिन्दुः, पताका, प्रकरी, कार्यं च सुस्पष्टं परिलक्षितम्। एते सर्वे तत्वानि केवलं नाट्यशास्त्रस्य वा साहित्यशास्त्रस्य मूलभूताङ्गत्वेन न तिष्ठन्ति अपि तु काव्यविन्यासस्य साङ्गोपाङ्गविकाशे अपि महत्त्वपूर्णं स्थानं धारयन्ति। विशेषतः कोशालानन्दमहाकाव्याध्ययनात् ज्ञायते यत् महाकाव्येऽस्मिन् इतिहासप्रसङ्गाः साहित्यिकमाधुर्येन सम्यगन्विताः सन्ति। कथा न केवल रसप्रधानतया प्रवर्तिता, अपितु साहित्यशास्त्रीयतत्त्वैः सम्यगन्विता विकशिताभवत्। तत्र पञ्चार्थप्रकृतयः कथायाः मेरुदण्डरूपेण विराजन्ते। बीजस्योत्पत्तिः, बिन्दोः कार्यनिर्वहणम्, पताकायाः विस्तीर्णप्रसरणं, प्रकर्याः प्रासङ्गिकतत्त्वं, कार्यस्य फलसिद्धिः इत्यादीनां सम्यक् समन्वयः अत्र द्रष्टुं शक्यते।

अतः अस्य महाकाव्यस्य अध्ययनं न केवलं काव्यरमणीयतायाः आस्वादनाय अपि तु कथाविन्यासशास्त्रस्य गूढतत्त्वानां विमर्शाय अपि परमावश्यकमस्ति। तस्मात्, कोशालानन्दमहाकाव्यं न केवलं इतिहासीयप्रसङ्गानां दर्पणमस्ति अपितु संस्कृतसाहित्ये कथा-विन्यास-संरचनायाः गम्भीरचिन्तनस्य प्रमुखं साधनं च भवति।

## Endnotes

1. दशरूपके. 1.18,
2. साहित्यदर्पणं -6/64,65
3. अग्निपुराण 338/22
4. साहित्यदर्पणं 6/65

5. कोशलानन्दमहाकाव्यं 1/33
6. तत्रैव 2/33
7. कोशलानन्दमहाकाव्यं 2/44
8. तत्रैव 2/55,56
9. साहित्यदर्पणं - 6/66, दशरूपके.-1/17,मल्लिकामकरन्दं-1/17
10. नाट्यशास्त्रः 21/22
11. कोशलानन्दमहाकाव्यं 3/1 तः 5
12. साहित्यदर्पणं -6/67
13. कोशलानन्दमहाकाव्यं सर्गः 9
14. साहित्यदर्पणं -6.68
15. साहित्यदर्पणं - 6.69
16. नाट्यशास्त्रे 19.25
17. नाट्यदर्पण-1.31
18. दशरूपके 1.13
19. कोशलानन्दमहाकाव्यं सर्गः 11/1,2 इत्यदि श्लोकात्।
20. साहित्यदर्पणं.-6/69-70
21. कोशलानन्दमहाकाव्यं सर्गः 4/11 इत्यदि श्लोकात्।

## Bibliography


- Anjaya, Tapankumar. *Sanskritadisha*. Jnanavani, 2013.
- Bharata Muni. *Natyashastra*. Edited by various scholars, Chowkhamba Sanskrit Sansthan, n.d.
- Dhananjaya. *Dasharupakam*. Edited by Sudhakar Malaviya, Chowkhamba Vidyabhawan, n.d.
- Girishwar, Sharma, and Parameshwaranand Sharma, editors. *Vaiyakarana Siddhantakaumudi (Balamanorama-Tattvabodhini Vyakhya)*. Vol. 2, Motilal Banarsidass, 2012.
- Jigyasu, Brahmadatta, editor. *Ashtadhyayisutrapatha*. Ramlal Kapoor Trust, 1977.
- Lahiri, Prabodh Chandra, and Hrishikesh Shastri. *Paniniyam*. The Dhaka Students' Library, 2012.
- Mishra, Gangadhara. *Koshalanandamahakavyam*. Edited and researched manuscripts, c. 1650-1700.
- Mishra, Ramashankar, editor. *Ashtadhyayisutrapatha*. Motilal Banarsidass, 2017.
- Mukhopadhyay, Sacchidananda, editor. *Vaiyakarana Siddhantakaumudi (Samasaprakaranam)*. Sahitya Niketan, 2012.
- Ramachandra and Gunachandra. *Natyadarpana*. Edited by various scholars, Gaekwad's Oriental Series, n.d.
- Shastri, Dwarikadas, and Kalikaprasad Shukla, editors. *Kashikavritti (Paniniyashtadhyayivyakhya)*. Vol. 4, Tara Publications, 1967.
- Vishwanatha Kaviraja. *Sahityadarpana*. Edited by Shaligram Shastri, Motilal Banarsidass, n.d.